Takshashila Project

विठस्कोउल्हराईस्यमिदंपुस्तकंपत्र२१

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

१

श्रीगणेशाय नमः हरिः ॐ ॥ अथेमा अतिसुनय इत्यास्य च
ऋतेः पिबासंप्रत्यय ऋग्वस्यान्महाभाग्याद्देवतायाः सोऽस्मि मे
वषंथममाहत्वं मगेघुभिस्त्वमाश्रुह्रेति रितियथैतस्मिन्नृ
केन हित्वरेरेनिमिमक्ष्वनेषाऽइतिवरुणस्याथैषेंद्रस्य।
१।यद्याव इंद्र ते शतं शतं भूमिरुत स्युः। न त्वा वज्रिंत्सहस्र
सूर्या अनु न जातमष्ट रोदसी॥ यदित इंद्र शतं दिवः
शतं भूमयः प्रतिमाना निस्युर्न त्वा वज्रिन्त्सहस्रमपि सू
र्यान द्यावा रोपिव्याव व्यभ्यश्नुवीना मित्यथैषाऽदित्य १

स्य॥२॥ यदुदंचो वृषाकपे गृहमिंद्राजगंतन। क्व१स्य पुल्वघो
मृगः कमगंजनयोपनो विश्वस्मादिंद्र उत्तरः॥ यदुदंचो वृ
षाकपे गृहमिंद्र जगमत क्वस्य पुल्वघो मृगः क्वस्य बक्वदी
मृगो मृगो मार्ष्टेर्गतिकर्मणः कमगमद्देशं जनयोपनः स
र्वस्माद्य इंद्र उत्तरः स्तमेतद्ब्रूमः आदित्यमथैषादित्य र
श्मीनां॥३॥ विहि सोतोरसृक्षत नेंद्रं देवममंसत। यत्रामद
द्वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिंद्र उत्तरः॥ व्य
सृक्षत हि प्रसवायन चेंद्रं देवममंसत यत्रामाद्यद्वृषाक

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

२ पिरर्थः ईश्वरः पुष्टेषु घोषेषु मन्त्सखाय मम सखा मदन सखा
ये नः सखायस्तैः सहेति वा सर्वस्याद्यः ॥ ६ ॥ उत्तरस्य मेतह्नु
मः आदित्य मध्ये वाश्विनोः ॥ ४ ॥ सृण्येव जर्भरी तुर्फरीतू नै
तोशेव तुर्फरी पर्फरीका ॥ उदन्यजेव जेमना मदेरू ता मे जरा
य्वजरं मरायु ॥ सृण्येवेति द्विविधा सरिभर्भवति मर्त्री च हन्ता
च तथाश्विनौ चापि भर्त्तारौ जर्भरी भर्त्तारावित्यर्थः तुर्फ
रीतू हन्तारौ ॥ नैतोशेव तुर्फरी पर्फरीका ॥ नितोशस्यापत्यं
नैतोशं नैतोशेव तुर्फरी क्षिप्रहन्तारौ ॥ उदन्यजेव जेमना २

मदेरू ॥ उदन्यजे वेत्युदके जे ऽङ्कवरत्ने सामुद्रे चांद्रमसी दिव
जेमने जयमने ॥ जेमना मदेरू ता मे जराय्वजरं मरायु ॥ एत
ज्जरायुजं शरीरं जरदमजीर्णं मध्वे वा सोमस्य ॥ ५ ॥ तरत्स मं
दी धावति धारा सुतस्यान्धसः ॥ तरत्स मन्दी धावति ॥ तरति स
पापं सर्वं मन्दीयस्तोतृ धावति गच्छत्यूर्ध्वं गतिं ॥ धारा सुत
स्यान्धसः ॥ धारयाभिषुतस्य सोमस्य मन्त्रपूतस्य वा चास्तु
तस्याध्यैवाय तु स्य ॥ ६ ॥ चत्वारि शृङ्गा त्रयो अस्य पादा द्वे
शीर्षे सप्त हस्तासो अस्य ॥ त्रिधा बद्धो वृषभो रोरवीति महो

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

नै०उ०

२ देवोमर्त्याँऽआविवेश॥चत्वारिश्रृंगेतिवेदावाऽएतऽउक्ता
स्त्रयोऽअस्यपादाऽइतिसवनानित्रीणिद्वेशीर्षेप्रायणी
योदयनीयेसप्तहस्तासःसप्तछंदांसित्रिधाबद्धस्त्रेधाबद्धो
मंत्रब्राह्मणकल्पैर्वृषभोरोरवीतिरोरवणमस्यसवनक्र
मेणऋग्भिर्यजुर्भिःसामभिर्यदेनमृग्भिःशंसंतियजुर्भिर्य
जंतिसामभिःस्तुवंतिमहोदेवऽइत्येषहिमहान्देवोयद्यज्ञो
मर्त्याँऽआविवेशेत्येषहिमनुष्याणाविशतियजनायत
स्योत्तराभूयसेनिर्वचनाय॥७॥स्वर्यंतोनापेक्षंतऽआ। २

द्यांरोहंतिरोदसी।यज्ञंयेविश्वतोधारंसुविद्वांसोवितेनिरे।
स्वर्गछंतईजानावानेक्षंतेतेमुमेवलोकंगतवंतऽईक्षंतऽइ
ति।आद्यांरोहंतिरोदसी।यज्ञंयेविश्वतोधारंसर्वतोधारं
सुविद्वांसोवितेनिरऽइत्यपैवावाचंप्रवल्हितेव॥८॥च
त्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषि
णः।गुहात्रीणिनिहितानेंगयंतितुरीयंवाचोमनुष्याव
दंति।चत्वारिवाचःपरिमितानिपदानितानिविदुर्ब्राह्म
णायेमेधाविनोगुहायांत्रीणिनिहितानिनार्थंवेदयंते

५ गुहा गूहते स्तुरीयं त्वरतेः कतमानि तानि चत्वारि पदान्यों
कारो महाव्याहृतयश्चेत्यार्षं नामाख्याते चोपसर्गनिपाता
श्चेति वैयाकरणा मंत्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकी
ति याज्ञिका ऋचो यजूंषि सामानि चतुर्थी व्यावहारिकीति
नैरुक्ताः सर्पाणां वाग्वयसां क्षुद्रस्य सरीसृपस्य चतुर्थी व्या
वहारिकीत्येके पशुषु तूणवेषु मृगेष्वात्मनि चेत्यात्मप्रवा
दाः अथापि ब्राह्मणं भवति सा वै वाक्सृष्टा चतुर्द्धा व्यभ ५
वदेष्वेव लोकेषु त्रीणि पशुषु तुरीयं या पृथिव्यां साग्नौ सा

रथंतरे यांतरिक्षे सा वायौ सा वामदेव्ये या दिवि सादित्ये
सा बृहती सा स्तनयित्नावथ पशुषु ततो या वागत्यरिच्य
त तां ब्राह्मणेष्वदधुस्तस्माद्ब्राह्मणा उभयीं वाचं वदंति
या च देवानां या च मनुष्याणामित्यथैषाक्षरस्य ॥ ऋ
चोऽक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समा
सते। ऋचोऽक्षरे परमे व्यवने यस्मिंदेवा अधि निषण्
णाः सर्वे यस्तन्न वेद किं स ऋचा करिष्यति य इत्तद्विदुस्ते

Takshashila Project
Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

ऽभूमे समासतऽइति विदुषऽउपदिशति कतमत्तदेतदक्षरमो
मित्येषा वागिति शाकपूणिः ऋचश्च ह्यक्षरे परमे व्यवने धी
यंते नानादेवतेषु च मंत्रेषु एतद्धवाऽएतदक्षरं यत्सर्वां त्रयीं
विद्यां प्रति प्रतीति च ब्राह्मणं ॥१७॥ आदित्यऽइति पुत्रः शा
कपूणिः एषर्ग्भवति यदेनमर्चंति प्रत्यृचः सर्वाणि भूतानि
तस्य यदन्यन्मंत्रेभ्यस्तदक्षरं भवति रश्मयोऽत्र देवाऽउच्यं
ते यऽएतस्मिन्नधि निषण्णाऽइत्यधिदैवतम् अथाध्यात्मं श
रीरमत्र ऋगुच्यते यदेनेनार्चंति प्रत्यृचं सर्वाणींद्रि

तस्य यदविनाशि धर्म तदक्षरं भवति प्राणाऽअत्र देवाऽउ
च्यंते यऽएतस्मिन्नधि निषण्णानीत्यात्मप्रवादाः ॥१८॥ अक्ष
रं न क्षरति न क्षीयते वाऽक्षयं भवति वाचोऽक्षऽइति वाऽक्षो या
नस्यांजनात्तत्प्रकृतीतरद्वर्तनिसामान्यादित्ययं मंत्रार्थ
चिंताभ्यूहोऽभ्यूढोऽपि श्रुतितोऽपि तर्कतो न तु पृथक्त्वेन मंत्रा
निर्वक्तव्याः प्रकरणशऽएव तु निर्वक्तव्या न ह्येषु प्रत्यक्षम
स्त्यनृषेरतपसो वा पारोवर्यवित्सु तु खलु वेदितृषु भूयोवि
द्यः प्रशस्यो भवतीत्युक्तं पुरस्तान्मनुष्या वा ऋषिषूत्क्रामत्सु

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

देवानब्रुवन्को नऽऋषिर्भविष्यतीति तेभ्यऽएतं तर्कमृषिं
प्रायच्छन्मंत्रार्थचिंताभ्यूहमभ्यूढं तस्माद्यदेव किंचानू
चानोभ्यूहत्यार्षं तद्भवति ॥१२॥ हृदा तष्टेषु मनसो जवे
षु यद्ब्राह्मणाः संयजंते सखायः ॥ अत्राह त्वं विजहुर्वेद्या
भिरोहब्रह्माणो विचरंत्युत्वे ॥ हृदा तष्टेषु मनसां प्रजवेषु
यद्ब्राह्मणाः संयजंते समानख्याना ऋत्विजोत्राह त्वं विज
हुर्वेद्याभिर्वेदितव्याभिः प्रवृत्तिभिरोहब्रह्माणऽऊहब्र
ह्माणऽऊहऽएषां ब्रह्मेति वा सेयं विद्या श्रुतिमतिबुद्धिस्त ६

स्यास्तपसा पारमीप्सितव्यं तदिदमायुरिच्छता न निर्वक्त
व्यं तस्माच्छंदःसु शेषाऽउपेक्षितव्याऽयआगमो यां यां देव
तां निराह तस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवति ॥१३॥
त्रयोदशस्य प्रथमः पादः ॥ छ ॥ ॐ ॥ व्याख्यातं दैवतं यज्ञां
गं चाथात ऊर्ध्वमार्गगतिं व्याख्यास्यामः सूर्य आत्मेत्यु
दितस्य हि कर्मद्रष्टाऽथैतदनुप्रवदत्यथैतं महांतमात्मा
नमेषर्ग्गणः प्रवदतींद्रं मित्रं वरुणमग्निमाहुरित्यथैषम
हानात्मात्मजिज्ञासयात्मानं प्रोवाचाग्निरस्मि जन्मना जा

७ तवेदाऽअहमस्मिप्रथमजाऽइत्येताभ्यां॥१॥अग्निरस्मिज
न्मनाजातवेदाघृतंमेचक्षुरमृतंमऽआसन्॥अर्कस्त्रिधा
तूरजसोविमानोजस्रोघर्मोहविरस्मिनाम॥अहमस्मिप्र
थमजाऋतस्यपूर्वंदेवेभ्योऽअमृतस्यनामायोमाददाति
सऽइदेवमावदहमन्नमन्नमदंतमद्मि॥इतिसहृज्ञात्वाप्रादु
र्भूवैवंतंव्राजन्तरायंतमात्मनिमध्यात्मजमंतिकमन्यु
भूस्माऽआचचक्ष्वेति॥२॥अपश्यंगोपामनिपद्यमानमाच
परांचपथिभिश्चरंतं॥ससध्रीचीःसविषूचीर्वसानऽआ ७

वरीवर्त्तिभुवनेष्वंतः॥आवरीवर्त्तिभुवनेष्वंतरित्यथैष
महानात्मासत्वलक्षणस्तत्परंतत्स्थूलंतत्सूक्ष्मंतत्सलि
लंतदव्यक्तंतदस्पर्शंतदरूपंतदरसंतदगंधंतदमृतंतच्छु
क्लंतन्निष्ठोभूतात्मासैषाभूतप्रकृतिरित्येवंतत्सैवंत
ज्ज्ञात्वात्सैवज्ञमनुप्राप्यनिरात्मकमथैषमहानात्मात्रि
विधोभवतिसत्वंरजस्तमइतिसत्वंतुमध्येविशुद्धंतिष्ठ
त्यभितीरजस्तमसीरजऽइतिकामद्वेषस्तमऽइत्यवि
ज्ञानंतस्यविशुद्धतोविभूतिकुर्वतःक्षेत्रज्ञस्थस्वकायक

Takshashila Project

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

८ लुप्यते प्रतिभातीति लिंगो महानात्मा तमो लिंगो विद्याप्रका
शलिंगः स मोपि निश्चयलिंगः आकाशः ॥६॥ आकाश
गुणः शब्दः आकाशाद्वायुर्द्विगुणस्पर्शेन वायोर्ज्योतिस्त्रिगु
णं रूपेण ज्योतिषः आपश्चतुर्गुणा रसेनाद्भ्यः पृथिवी पंचगु
णा गंधेन पृथिव्या भूतग्रामः स्थावरजंगमास्तदेतदहर्युग
सहस्रं जागर्त्ति तस्यांते सुषुप्स्यन्नंगानि प्रत्याहरति भूत
ग्रामाः पृथिवीमप्यियंति पृथिव्यपः आपो ज्योतिषं ज्योति
र्वायुराकाशमाकाशो मनो मनो विद्यां विद्या महांतमात्मा ८

नं महानात्मा प्रतिभां प्रतिभा प्रकृतिं सा स्वपिति युगसह
स्रं रात्रिस्तावेतावहोरात्रावजस्रं परिवर्त्तेते स कालस्तदे
तदहर्न्नवति युगसहस्रपर्यंतमहर्यद्ब्रह्मणो विदू रात्रिं यु
गसहस्रांतां तेऽहोरात्रविदो जना इति ॥१७॥ ॥ तं परिवर्त्त
मानमन्योनुप्रवर्त्तते स्रष्टा द्रष्टा विभक्ताऽतिमात्रोऽहमिति ग
म्यते स मिथ्यादर्शनेदं पावकं महाभूते शुचिरेणवाकाशाद्वा
योः प्राणं चक्षुश्च वक्तारं च तेजसोऽद्भ्यः स्नेहं पृथिव्या मूर्त्तिः
पार्थिवांस्तु गुणान्विद्यास्त्रीन्मारुतः स्पर्शान्पित्ततोऽस्थिस्ना

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

६ षुमज्ञानः पित्रतः स्वेष्मासंशोँतानिमात्रतोन्यकानमित्यु श्री
क्तौसोयंपुरुषः सर्वमयः सर्वज्ञानोपिसृष्टः ॥१८॥ ५॥
सयद्यनुरुध्यतेतद्भवतियदिधर्मोनुरुध्यतेतद्देवोभवति
यदिज्ञानमनुरुध्यतेतदमृतोभवतियदिकाममनुरुध्यते
संचवतइमांयोनिंसंदध्यात्तदिदमंनमन्नं स्लेष्मारतसः
संभवतिस्लेष्मणोरसोरसाछ्छोणितंशोणितान्मांसंमांसा
न्मेदोमेदःसस्नावास्नाव्नोस्थीन्यस्थिभ्योमज्जामज्जातोरेतः
स्तदिदंयोनौरेतःसिक्तंपुरुषःसंभवतिशुक्रातिरेकेपु ६

मान्भवतिशोणितातिरेकेस्त्रीभवतिद्वाभ्यांसमेननपुंस
कोभवतिशुक्रेणभिन्नेनयमोभवतिशुक्रशोणितसंयो
गान्मातृपितृसंयोगाच्चकथमिदंशरीरंपरंसंयंम्युतेसौम्यो
भवत्येकरात्रोषितंकललंभवतिपंचरात्राद्बुद्बुदः सप्तरा
त्रात्पेशीद्विःसप्तरात्रादर्बुदः पंचविंशतिरात्रः स्वस्थितो
घृतोभवतिमासमात्रात्कठिनोभवतिद्विमासाभ्यंतरेण
शिरः संपद्यतेमासत्रयेणग्रीवाव्यादेशोमासचतुष्केण
त्वग्व्यादेशः पंचमेमासेनखरोमव्यादेशः षष्ठेमुखनासि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

१० काक्षिं श्रोत्रं च संभवति सप्तमे चलनसमर्थो भवत्यष्टमे तु
ध्याध्यवस्यति नवमे सर्वाङ्ग संपूर्णो भवति ॥ मृतश्चाहं पुन
र्जातो जातश्चाहं पुनर्मृतः ॥ नानायोनिसहस्राणि मयोषि
तानि यानि वै ॥ आहारा विविधा भुक्ताः पीता नानाविधास्तनाः
॥ मातरो वै विधा दृष्टाः पितरः सुहृदस्तथा ॥ अवाङ्मुखः पी
ड्यमानो जंतुश्चैव समन्वितः ॥ सांख्यं योगं समभ्यस्येत्पु
रुषं वा पंचविंशकमिति ततश्च दशमे मासे प्रजायते १०
जातश्च वायुना स्पृष्टो न स्मरति जन्ममरणं तेच शुभाशु

भं कर्मैतच्छरीरस्य प्रामाण्यं ॥१८॥ ६ ॥ अष्टोत्तरं संधि
शतमष्टाकपालं शिरः संपद्यते षोडशवपापलानि न
वस्नायुशतानि सप्तशतं पुरुषस्य मर्मणामर्द्धचतस्रो
रोमाणि कोट्यो हृदयं त्वष्टकपालानि द्वादशकपालानि
जिह्वा वृषणौ स्पष्टस्तुपर्णौ निघोपस्थ गुदपाय्वेतन्मूत्र
पुरीषं कस्मादाहारपानसिक्तत्वादनुपचितकर्मणा
वन्योन्यं जायते इति ॥ श्री ॥ तं विद्याकर्मणी समन्वारभे
ते पूर्वप्रज्ञा च महत्यज्ञानतमसि मग्नो जरामरणक्षु

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

नि०उ०
११

त्पिपासाशोकक्रोधलोभमोहमदभयमत्सरहर्षविषा
देर्ष्यासूयात्मकैर्द्वंद्वैरभिभूयमानः सोऽस्मादार्जवंजवी
भावान्नांतंनिर्मुच्यते सोऽस्मात्प्राङ्नमत्ताभूमिकावच्छरी
राणिमेघमाचैः जन्मप्रकृतिरधिपरीत्यतैनसंस्कारी
रंकृत्वाकर्मण्यनुरूपंफलमनुभूयतस्यसंक्षयेपुनरि
मंलोकंप्रतिपद्यते॥२०॥७॥अथयेहिंसामाश्रित्यवि
द्यामुत्सृज्यमहत्तपस्तेपिरेचिरेणवेदोक्तानिवाकर्मा
णिकुर्वंतितेधूममभिसंभवंतिधूमाद्रात्रिंरात्रेरपक्षी ११

यमाणपक्षमक्षीयमाणपक्षाद्दक्षिणायनंदक्षिणाय
नात्पितृलोकंपितृलोकाच्चंद्रमसंचंद्रमसोवायुंवायो
र्वृष्टिंवृष्टेरोषधयश्चैतद्भूत्वापुनरेवेमंलोकंप्रतिपद्य
ते॥२१॥८॥अथायेहिंसामुत्सृज्यविद्यामाश्रित्यमह
त्तपस्तेपिरेज्ञानोक्तानिवाकर्माणिकुर्वंतितेर्चिरभि १२
संभवंत्यर्चिषोरहरह्नआपूर्यमाणपक्षमापूर्यमाणपक्षा
दुदगयनमुदगयनाद्देवलोकंदेवलोकादादित्यमादि
त्याद्वैद्युतंवैद्युतान्मानसंमानसःपुरुषोभूत्वाब्रह्मलो

Takshashila Project
Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

कमभिसंभवतिनचेपुनरावर्त्ततेत्रिष्टादंदंषूकायतद्दं
नजानंतितस्मादिदंवेदितव्यमथाप्याह॥२२॥२॥नतंवि
दाथयऽइमाजुजाननान्यद्युष्माकमंतरंबभूव॥नीहारेण
प्रावृताजल्प्याचासुतृपऽउक्थशासश्चरंति॥नतंविद्य
थाविदुषोयमेविद्वांसोवदंत्यक्षरंब्रह्मणस्पतिरिमन्यद्यु
ष्माकमंतरमन्यदेषामंतरंबभूवेतिनीहारेणप्रावृता
स्तमसाजल्प्याचासुतृपउक्थशासः प्राणंसूर्यंयंत्यथ
गामिन्यश्चरंत्यविद्वांसः क्षेत्रज्ञमनुभवंदंत्यथाहेवि १२

द्वांसःक्षेत्रज्ञोनकल्पतेतस्यतपसासहस्रमादेनेत्या
त्रव्योभवतितेनासंततस्मिंछेत्रेनासरम्यमिछेदेसहि
सरवाश्रेष्ठः संजानातिभूतंभवद्भविष्यदितिज्ञाताक
स्माज्ञायतेऽसरवाकस्मात्सव्यतेऽसहभूतेद्वैरथ्येक्षेतेम
हाभूतानिसेंद्रियाणिप्रज्ञयाकर्मकारयतीतिवातस्य
तपःप्रतिष्ठाशीलमुपशमऽआत्माब्रह्मेतिसब्रह्मभूतो
भवतिसाक्षिमात्रोव्यवतिष्ठतेबंधोज्ञानकृतोयात्मनो
महतः प्रथमंभूतनामधेयान्यनुक्रमिष्यामः॥२३॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

१३ १४॥ हंसः। घर्मः। यज्ञः। वेनः। मेधः। कृमिः। भूमिः। विभुः।
प्रभुः। संभुः। रांभुः। वधकर्मा। सोमः। भूतं। भुवनं। भविष्य
त्। आपः। महत्। व्योम। यशः। महः। स्वर्णीकं। स्मृतीकं। स्वृतीकं
सतीकं। सतीनं। गहनं। गभीरं। गह्वरं। कं। अन्नं। हविः। स
द्म। सदनं। ऋतं। योनिः। ऋतस्य योनिः। सत्यं। नीरं। रयिः।
सत्। पूर्णं। सर्वं। अक्षितं। बर्हिः। नाम। सर्पिः। अपः। पवित्रं।
अमृतं। इंदुः। हेम। स्वः। सर्गाः। शंबरं। अंबरं। वियत्। व्यो
म। बर्हिः। धन्व। अंतरिक्षं। आकाशं। आपः। पृथिवी। भूः। १३

स्वयंभूः। अध्वा। पुष्करं। सगरं। समुद्रः। तपः। तेजः। सिंधुः।
अर्णवः। नाभिः। ऊधः। वृक्षः। तत्। यत्। किं। ब्रह्म। वरे
ण्यं। हंसः। आत्मा। भवंति। वर्धंति। अध्वानं। यद्वाहिष्ठा
शारीराणि। अभ्यंजसा। कुरुते। यज्ञः। आत्मा भवति। य
देनं तन्वते। थैतं महांतमात्मानमेतानि सूक्तान्येता ऋ
चोनुप्रवदंति॥२४॥१॥ सोमः पवते जनिता मतीनां
जनिता दिवो जनिता पृथिव्याः। जनिताग्नेर्जनिता सूर्य
स्य जनितेंद्रस्य जनितोत विष्णोः। सोमः पवते ज नयिता

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

नि०उ०

२४ मतीनां जनयिता दिवो जनयिता पृथिव्या जनयिताग्नेर्ज-
नयिता सूर्यस्य जनयितेन्द्रस्य जनयितोत विष्णोः ॥२५॥
॥२६॥ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृ-
गाणां ॥ श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रम-
त्येति रेभन् ॥ ब्रह्मा देवानामित्येष हि ब्रह्मा भवति देवानां
ष्णु देवनकर्मणामादित्यरश्मीनां पदवीः कवीनामित्येष हि
पदं वेत्ति कवीनां कवीयमानानामादित्यरश्मीनामृ- २४
षिर्विप्राणामित्येष ह्यृषिणो भवति विप्राणां व्यापनक-

र्मणामादित्यरश्मीनां महिषो मृगाणामित्येष हि महा-
न्भवति मृगाणां मार्गणकर्मणामादित्यरश्मीनां श्येनो
गृध्राणामिति श्येनऽआदित्यो भवति श्यायतेर्गतिक-
र्मणो गृध्रऽआदित्यो भवति गृध्यते स्थानकर्मणो यत एत- स
स्मिंस्तिष्ठति स्वधितिर्वनानामित्येष हि स्वयं कर्माण्या-
दित्यो धत्ते वनानां वननकर्मणामादित्यरश्मीनां सो-
मः पवित्रमत्येति रेभन्नित्येष हि पवित्रं रश्मीनामत्ये-
ति स्तूयमान एष एवैतत्सर्वमक्षरमित्याधिदैवतमथा-

Takshashila Project
Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

१५ ध्यात्मं ब्रह्मादेवानामित्ययमपि ब्रह्मा भवति देवानां देव
कर्मणामिंद्रियाणां पदवीः कवीनामित्ययमपि पदं वेत्ति
कवीनां कवीयमानानामिंद्रियाणामृषिर्विप्राणामित्य
यमप्यृषिणो भवति विप्राणां व्यापनकर्मणामिंद्रियाणां
महिषो मृगाणामित्ययमपि महान्भवति मृगाणां मार्ग
णकर्मणामिंद्रियाणां श्येनो गृध्राणामिति श्येनः आत्मा
भवति श्यायतेर्ज्ञानिकर्मणो गृध्राणींद्रियाणि गृध्यतेर्ज्ञा
नकर्मणो यत्र तस्मिंस्तिष्ठंतीति स्वधितिर्वनानामित्यय १५

मपि स्वयं कर्माण्यात्मनि धत्ते वनानां वननकर्मणामिं
द्रियाणां सोमः पवित्रमत्येति रेभन्नित्ययमपि पवित्रमिं
द्रियाण्यत्येति स्तूयमानोयमेवैतत्सर्वमनुभवत्यात्म
गतिमाचष्टे ॥२॥१२॥ तिस्रो वाच ईरयति प्रवह्निर्ऋत
स्य धीतिं ब्रह्मणो मनीषां । गावो यंति गोपतिं पृछमानाः
सोमं यंति मतयो वावशानाः ॥ वह्निरादित्यो भवति स
तिस्रो वाचः प्रेरयत्यृचो यजूंषि सामान्यृतस्यादित्य
स्य कर्माणि ब्रह्मणो मतान्येषोऽऽवैतत्सर्वमक्षरमित्य

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

१६ धिदैवतमथाध्यात्मं वर्क्षिरात्माभवतिसतिस्योवाच्यः
ईरयतिप्रेरयतिविद्यामतिबुद्धिमतामृतस्यात्मनःकर्मा
णिब्रह्मणोमहान्ययमेवैतत्सर्वमनुभवत्यात्मगतिमा
चष्टे॥२७॥१४॥सोमंगावोधेनवोवावशानाःसोमंवि
प्रामतिभिःपृच्छमानाः॥सोमःसुतःपूयतेऽअज्यमा
नःसोमेऽअर्कास्त्रिष्टुभःसन्नवंते॥एतएवसोमंगा
वोधेनवोरश्मयोवावाश्यमानाःकामयमानाऽआदि
त्यंयंत्येवमेवसोमंविप्रारश्मयोमतिभिःपृच्छमानाःका १६

मयमानाऽआदित्यंयंत्येवमेवसोमःसुतःपूयतेऽ
अज्यमानःएतमेवार्काश्चत्रिष्टुभश्चसन्नवंतेतऽए
तस्मिन्नादित्यऽएकंभवंतीत्यधिदैवतमथाध्यात्ममे
तऽएवसोमंगावोधेनवऽइंद्रियाणिवावाश्यमानानि
कामयमानान्यात्मानंयंत्येवमेवसोमंविप्राऽइंद्रिया
णिमतिभिःपृच्छमानानिकामयमानान्यात्मानंयंत्येव
मेवसोमःसुतःपूयतेऽअज्यमानःइममेवात्मानंचसज्ञ
न्छयश्चसंनवंतेतानीमान्येतस्मिन्नात्मन्येकंभवं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

सै० उ०

१७ तीत्यात्मगतीमाच्वुहे॥२८॥१५॥अक्रांन्समुद्रः प्रथमे
विधर्मंजनयन्प्रजाभुवनस्यराजा॥वृषापवित्रेऽअधि
सानोऽअव्येबृहत्सोमोवावृधेसुवानऽइंदुः॥अत्यक्र
मीत्समुद्रऽआदित्यःपरमेव्यवनेवर्षकर्मणाजनय
न्प्रजाभुवनस्यराजासर्वस्यराजावृषापवित्रेऽअधि
सानोऽअव्येबृहत्सोमोवावृधेसुवानऽइंदुरित्यधिदै
वतमथाध्यात्ममस्यक्रमीत्समुद्रऽआत्मापरमेव्यवने
ज्ञानकर्मणाजनयन्प्रजाभुवनस्यराजासर्वस्यराजा १७

राजावृषापवित्रेऽअधिसानोऽअव्येमहत्सोमोवावृ
धेसुवानऽइंदुरित्यात्मगतिमाच्वुहे॥२८॥१६॥महत्सोमो त
महिषश्चकारापांयद्गर्भोवृणीतदेवान्। अदधादिंद्रेप
वमानऽओजोजनयत्सूर्येज्योतिरिंदुः॥महत्तत्सोमोम
हिषश्चकारापांयद्गर्भोवृणीतदेवानामाधिपत्यमदधा
दिंद्रेपवमानऽईजोजनयत्सूर्येज्योतिरिंदुरादित्यऽइंदु
रात्मा॥२०॥१७॥विधुंदद्राणंसमनेबहूनांयुवानंसंतं
पलितोजगाराद्देवस्यपश्यकाव्यंमहित्वाद्यामारसहः

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

समान॥ विधुं विधमनशीलं दद्राणं दमनशीलं युवानं चं
द्रमसं पलितऽ आदित्यो गिरति स द्यो म्रियते स दिवा समुदि
तेत्यधिदैवतमथाध्यात्मं विधुं विधमनशीलं दद्राणं द
मनशीलं युवानं महांतं पलितऽ आत्मा गिरति स रात्रौ म्रि
ते यते रात्रिः समुदेति स्वात्मगतिमाचष्टे॥ ३॥ १८॥ साकं
जानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति
॥ ते षामिष्टानि विहितानि धामशः स्थात्रे रेजंते विकृता
निरूपशः॥ सहजातानां षण्णामृषीणामादित्यः सप्तम १८

स्तेषामिष्टानि वा कांतानि वा क्रांतानि वा गतानि वा मता
नि नतानि वाद्भिः सहसंमोदंते यत्रैतानि सप्त ऋषीणा
नि ज्योतींषि तेभ्यः परऽ आदित्यः तान्येतस्मिन्नेकं भवंती
त्यधिदैवतमथाध्यात्मं सहजातानां षण्णामिंद्रियाणामा
त्मा सप्तमस्तेषामिष्टानि वा कांतानि वा क्रांतानि वा गता
नि वा मतानि वा नतानि वान्नेन सहसंमोदंते यत्रेमा
नि सप्त ऋषीणानींद्रियाण्येभ्यः परऽ आत्मा तान्यस्मि ते
न्नेकं भवंतीत्यात्मगतिमाचष्टे॥ ३॥ १९॥ ॥ इति द्विती

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

नै॰ ७७

१९ यः पादः॥ ॥स्त्रियः सतीस्तां उ मे पुंस आहुः पश्यदक्षण्वा श्री
न्न वि चेतदंधः॥ कविर्यः पुत्रः स ईमा चिकेत यस्ता विजा
नात्स पितुष्पितासत स्त्रियः ऽ एवैताः शब्दस्पर्शरसरूपगंध
हारिण्यस्ताऽअमुं पुंशब्दैर्निराहुः आण इति पश्यदक्ष न
ण्वान्न विजानात्यंधः कविर्यः पुत्रः स ईमा जानाति यः स
ईमा जानाति स पितुष्पिता स्यात्म गतिमाचष्टे ॥२२ सदि
॥सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा वि ६९
धर्मणि॥ ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि

भवंति विश्वतः॥ सप्तैतानादित्यरश्मीनयमादित्यो गि
रति मध्यस्थानो ऊर्ध्वो यान्यस्मिंस्तिष्ठन्ति तानि धीतिभि
श्च मनसा च विपर्ययति परिभुवः परिभवंति सर्वाणि क
र्माणि वर्षकर्मणेत्यधिदैवतमथाध्यात्मं सप्तैमानींद्रि
याण्येयमात्मा गिरति मध्यस्थानो ऊर्ध्वो यान्यस्मिंस्ति
ष्ठंति तानि धीतिभिश्च मनसा च विपर्ययंति परिभूर्णि प
रिभवंति सर्वाणि कर्माणि ज्ञातकर्मणे स्यात्मगतिमाच
ष्टे॥२३॥२॥ न वि जानामि यदिवेदमस्मि निण्यः संनद्धो म

Takshashila Project

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

नसाचरामसि॥यदामागन्प्रथमजाऋतस्यादिद्वाचोअ
श्नुवेभागमस्याः॥नविजानामियदिवेदमस्मिनिण्यःसं
न्नद्धोमनसाचरामिनहिजानन्सुहृदःपुत्रःपरिवेदयंते
यमादित्योयमात्मा॥१५॥२॥अपाङ्प्राङेतिस्वधयागृ
भीतोमर्त्योमर्त्येनासयोनिः॥ताशश्वंताविषूचीनावि
यंतान्यन्यंचिकुर्ननिचिकुरन्यं॥अपाङ्र्यतिप्राङ्र्य
तिस्वधयागृभीतोमर्त्योऽआदित्योमर्त्येनचंद्रमसासह
तौशश्वद्गामिनौविश्वगामिनौवहुगामिनौवापश्यत्या २०

दित्यंनचंद्रमसमित्यधिदैवतमथाध्यात्ममपाङ्र्यति
प्राङ्र्यतिस्वधयागृभीतोमर्त्योऽआत्मामर्त्येनमनसासह
तौशश्वद्गामिनौविश्वगामिनौवहुगामिनौवापश्यत्या
त्मानंनमनइत्यात्मगतिमाचष्टे॥१६॥४॥तदिदमा
सभुवनेषुज्येष्ठंयतोजज्ञऽउग्रस्त्वेषनृम्णः॥सद्योज
ज्ञानोनिरिणातिशत्रून्ननुयंविश्वेमदंत्यूमाः॥तद्भव
तिभूतेषुभुवनेषुज्येष्ठमादित्यंयतोजज्ञऽउग्रस्त्वेष
नृमणोदीप्तिनृमणःसद्योजज्ञानोनिरिणातिशत्रूनिति

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

निरिणातिःशीतिकर्मा दीप्तिकर्मा वानुमदंतीयं विश्वऽ
उमा इत्यधिदैवतमथाध्यात्मं तद्भवति भूतेषु भुवनेषु
ज्येष्ठमव्यक्तं यतो जायत उग्रस्त्वेषनृम्णो ज्ञानन्नृम्णः स
द्योजज्ञानो निरिणातिःशत्रून् निति निरिणातिः शीतिकर्मा
दीप्तिकर्मा वानुमदंतीयं सर्वउमा इत्यात्मगतिमाचष्टे
॥२७॥५॥ कोऽअद्य युंक्ते धुरि गा ऋतस्य शिमीवतो भा
मिनो दुर्हृणायून्॥ आसन्निषून् हृत्स्वसो मयोभून्य ए
षां भृत्यामृणधत्स जीवात्॥ कऽआदित्यो धुरि गा युंक्ते २१

रश्मीः कर्मवतो भानुमतो दुराधर्षानस्सन सुन्वंतीबूनि
षुण्वंति मयोभूनि सुखभूनि सुखभूनि यऽइमं संभृतं वे
दकथं सजीवतीत्यधिदैवतमथाध्यात्मं कऽआत्मा धुरि
गा युंक्तऽइंद्रियाणि कर्मवंति भानुमंति दुराधर्षानस्स
न सुन्वंतीस्सूनीषुण्वंति मयोभूनि सुखभूनि यऽइमानि
संभृतानि वेद चीरं सजीवतीत्यात्मगतिमाचष्टे॥२८॥६॥
कऽईषते तुज्यते को बिभाय को मंसते संतमिंद्रं कोऽअं
तिकस्तोकाय कऽइभायोत रायेऽधिब्रवत्तन्वे कोजनाय॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

नै० ७ ३०

२२ कःस्वर्गंगच्छतिकोददातिकोबिभेतिकोमंसतेसंतमिदं
कस्तोकायापत्यायमहतेचनोरणायरमणीयायदर्श
नीयाय॥२६॥७॥कोऽग्निमीट्टेहविषाघृतेनस्रुचा
यजाताक्रतुभिर्ध्रुवेभिः॥कस्मैदेवाआवहानाशुहोम
कोमंसतेवीतिहोत्रःसुदेवः॥कआदित्यंपूजयतिहविषा
चघृतेनचस्रुचायजाताक्रतुभिध्रुवेभिरितिकस्मैदेवा
आवहानाशुहोमार्थान्कोमंसतेवीतिहोत्रःसुदेवःक
स्याणदेवःइत्यधिदैवतमथाध्यात्मंकःआत्मानंपूज २२

यतिहविषाचघृतेनचस्रुचायजाताक्रतुभिर्ध्रुवेभि
रितिकस्मैदेवाऽआवहानाशुहोमार्थान्कोमंसतेवीति
होत्रःसुप्रज्ञःकल्याणप्रज्ञइत्यात्मगतिमाचष्टे॥४०॥
॥८॥त्वमंगप्रशंसिषोदेवःशविष्ठमर्त्यं॥नत्वदन्योमघव शो॥
न्नस्तिमर्डितेंद्रब्रवीमितेवचः॥त्वमंगप्रशंसीदेवः
शविष्ठमर्त्यंनत्वदन्योऽस्तिमघवन्मातावापालयितावा
जेतावासुखयितावेंद्रब्रवीमितेवचइतिस्तुतिसंयुक्तं ह्
॥४१॥९॥ ॥इतित्रयोदशस्यतृतीयःपादः॥ ॥ॐ३म्॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

२२ ॥द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते॥
तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नंनन्योऽअभीचाकशी
सुक्तै ति॥द्वौद्वौप्रतिष्ठितौधर्मकर्त्तारौदुःष्कृतंपापंपरिहारक
मित्याचक्षतेसुपर्णासयुजासखायेत्यात्मानंपरमात्मा
नंप्रत्युत्तिष्ठतिशरीरऽएवतज्जायतेवृक्षंवृक्षंशरीरंहृ से:
दस्थौप्रतिष्ठापयन्तितयोरन्यद्भुक्त्वांस्यमश्नंनन्यांसरूप
तांसलोकतामश्नुतेयएवंवेदानश्नंनन्योऽअभिचाक
शीतीत्यात्मगतिमाचष्टे॥४२॥१॥विप्रंविप्रासोवसे २२

देवंमर्त्तासऽऊतये॥अग्निंगीर्भिर्हवामहे॥विप्रंविप्रा
सोवसेविदुर्विदतेवेदितव्यंविमलंशरीरंवायुनावि
प्रस्तुपश्चान्निलयंहृदिस्थितमकारंसंहारितमकारंपूज
यन्मकारंनिलयंगमयतिविप्रंप्राणेषुविदुःसितंविक
सितंवह्नितेजःप्रभुंकनकंपद्मेषुमृतशरीरममृतंजा रम
तस्थिममृतवाचाऽअमृतमुखावदंतिअग्निंगीर्भिर्हवा
महेअग्निःसंबोधयेदग्निःसर्वादेवताऽइतितस्योत्तरा
भूयसेनिर्वचनाय॥४२॥२॥हंसःशुचिषद्वसुरंतरिक्ष

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

नैं०उ०

२४ सद्धोतावेदिषदतीथिर्दुरोणसन्नृषद्वरसदृतसद्व्योम
सदब्जागोजाऋतजाऽअद्रिजाऋतं॥हंसेतिहंसाःसूर्य
रश्मयःपरमात्मापरंज्योतिःपृथिव्याश्चेतिव्याप्तंसर्वव्या
प्तंवननकर्मभ्यासेनादित्यमंडलेनेतित्यजतीतिलोक
स्त्यजतीतिहंसस्त्यजतीतिहंसाःपरमात्मासूर्यरश्मिभिः
त्रभूतगर्भात्वसतीतिश्रिभिवसतीतिवावह्निवसती
तिवारश्मिभिर्वसतीतिवासुवर्णरेताःपुरुषागर्भारिपि
रितिरिफितावाचमकुटिलानिकुर्वंतारिफंतांतरिक्षंचरे २४

दथैस्यंतरिक्षंचरतीतिदिविभ्रमिगमनंवास्वर्भानुःसु
त्रसूतोहोताहोतादित्यस्यगंताभवंत्यतिथिर्दुरोण
संडुवंतिसर्वैरसाधिकीर्थयंतीतिवानंतंभवतीत्य
श्वगोजाऽअद्रिगोजाधनगोजाःसर्वगोजाऽइतिर्ऋच
इतिजोवकुजोग्राव्दोभवतिनिगमोनिगमश्रोभव
त्यभिनिर्वचनाय॥ ४४॥ २॥ त्र्यंबकंयजामहेसुगंधि
पुष्टिवर्द्धनं।उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमा
मृतात्॥ त्र्यंबकोरुद्रस्तं त्र्यंबकंयजामहेसुगंधिंसु

Takshashila Project

नै॰उ॰

२५ सुगंधिं पुष्टिवर्द्धनं पुष्टिकारकमिवोर्वारुकमिव बंध
नाद्दारोधनान्मृत्योः सकाशान्मुंचस्व मां कस्मादित्येषामि
नरेष्वापरो भवति ॥ ४५ ॥ ४ ॥ जातवेदसे सुनवाम सोम
मरातीयतो निदहाति वेदः ॥ स नः पर्षदति दुर्गाणि वि
श्वा नावेव सिंधुं दुरितात्यग्निः ॥ जातवेदसः इति जात
वेदं सर्वं सचराचरं स्थितं स्तुत्यति अलयं मायेन जातवे
दस्मा इदं जातवेदसे अर्चीय सुनवाम सोममिति प्रस
वाय अभिषवाय सोमं राजानममृतममरातीयतो य २५

श्चार्थमनिस्सो निर्दहाति निश्चयेन दहति भस्मी करोति
सोमो ददतीत्यर्थः ॥ स नः पर्षदति दुर्गाणि विश्वानि दुर्ग
मान्यानि स्थानानि नावेव सिंधुं नावा सिंधुं यथा यः क
श्चित्कर्णधारो नावा सिंधुः स्पंदमानानां नदी जलदुर्ग
महाकुलं तारयति दुरितात्यग्निरिति दुरितानि तारय
ति तस्मै ष्वापरो भवति ॥ ४६ ॥ ५ ॥ शतं जीव शरदो वर्द्धमा
नः शतं हेमंतां छतमु वसंतान् ॥ शतमिंद्राग्नी सविता
बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥ शतं जीव शरदो

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

वर्द्धमानऽइत्यपिनिगमोभवतिशतमितिशतंदीर्घमा
युर्मरुतोमांवर्द्धयंतिशतमेवशतमात्मानंभवतिशत
मितिशतंदीर्घमायुः॥४३॥२॥मातेराधांसिमातऊत
योवसोस्मान्कदाचनादभन्॥विश्वाचनऽउपमिमीहि
मानुषवसूनिचर्षणिभ्यऽआ॥माचतेधनानिमाच
तेकदाचनसरिषुः सर्वाणिप्रज्ञानान्युपनामयमनुष्य
हितोयमादित्योयमात्माथैतदनुप्रवदन्त्यथैतंमहां
तमात्मानमेषगणःप्रवदतिवैश्वकर्मणोदेवानांनु २६

वयंजानानासदासीनोसदासीत्तदानीमितिचसैषात्म
जिज्ञासासैषासर्वभूतजिज्ञासाब्रह्मणः सार्ष्टिंसरूपतां
सलोकतांगमयतियऽएवंवेदनमोब्रह्मणेनमोमहते
देवायनमोयास्कायब्रह्मशुक्लमसीयब्रह्मशुक्लमसी
य॥४८॥७॥ ॥इतियास्काचार्यनिरुक्तेत्रयोदशोध्या
यः॥१३॥समाप्तः॥ ॥संवत्१८६७नाचैत्रसुदि१३त्रयो
दश्यांनागरविसंनगराज्ञातीयजोशीअंबिकेश्वरेणश्री
वंशपुरस्थितेसतीलिखितमिदंपुस्तकं॥ ॥शुभंभवतु॥ २७

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

पं॰श्रीअमरतनजी पं॰श्रीउदेचंदजी सुत इजतजी सुत भ
वानीशंकरजी ॥ इ गवरीशंकर पठनार्थं लिखावितं ९३१

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi